# क्षेत्रीयकार्यालयः एरणाकुलम्

## सङ्कलितप्रश्नपत्रम् संस्कृतम् ( सम्प्रेषणात्मकम्)122

## सङ्कलनात्मकं मूल्याङ्कनम् प्रथमसत्रम्

## कक्षा दशमी ( SUMMATIVE ASSESSEMENT I)

समयः होरात्रयात् सार्धहोरात्रयपर्यन्तम्। पूर्णाङ्काः **90**

निर्देशाः TIME 3 Hrs

**1** प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः | क अपठित अवबोधनम् | **10** अङ्काः |
| खण्डः | ख रचनात्मकं कार्यम् | **15** अङ्काः |
| खण्डः | ग अनुप्रयुक्तव्याकरणम् | **30** अङ्काः |
| खण्डः | घ पठितावबोधनम् | **35** अङ्काः |

**2** सर्वे प्रश्नाः अनिवार्याः।

**3** प्रश्नानाम् उत्तराणि प्रदत्तस्थाने एव लेखनीयानि।

**4** प्रश्नसङ्ख्या अवश्यं लेखनीया।

**5** उत्तराणि संस्कृतभाषया एव लेखनीयानि।

### खण्डः (क) अपठित अवबोधनम् **10** अङ्काः

अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।

जीवने किमपि लक्ष्यम् अवश्यम् भवेत् लक्ष्यहीनम् जीवनम् तु पशुतुल्यमेव।लक्ष्यम् अपि उच्चं परहितकारकं च भवेत्।एतादृशेन लक्ष्येण अस्माकं जीवनम् उत्साहपूर्णम् भविष्यति।परोपकारेण एव मनुष्यः जीवने वास्तविकम् सुखम् शान्तिम् च आप्नोति।यदि जनाः आलोचनां कुर्वन्तु तदा अपि फलस्य चिन्तां विना अग्रे गमनम् एव अस्माकम् कर्तव्यम्। अनेन जीवने स्थिरता आगमिष्यति।जनानां कीर्तिः स्थिरा भविष्यति।लक्ष्यं प्रति प्रेम वर्धनेन कार्ये कुशलता जायते कुशलः च।नरः जीवने किमपि असाध्यम् न मन्यते।सर्वं सम्भवं करणे सः समर्थो भवति।

क **1** एकपदेन उत्तरत। **2**

अ ) कस्य चिन्तां विना अग्रे गन्तव्यम्?

आ) कीदृशं जीवनम् पशुतुल्यमेव?

इ) मनुष्यः जीवने केन वास्तविकम् सुखम् आप्नोति?



www.jsuniltutorial.weebly.com
JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science

ई) जीवने किम् अवश्यं भवेत्?

क) 2 पूर्णवाक्येन उत्तरत। **4**

उ ) अस्माकं लक्ष्यं कीदृशं भवेत्?

ऊ ) अस्माकंजीवनम् उत्साहपूर्णं कथं भविष्यति?

क 3 यथानिर्देशं समुचितमुत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत। **4**

ऋ ) 'एतादृशेन' इति पदं कस्य विशेषणम् ?

अ) धनस्य । ब । लक्ष्यस्य । स । बलस्य । द । गृहस्य ।

ए ) 'कुर्वन्तु' इति क्रियापदस्य कर्तृपदं किम् ?

अ) यदि । ब । आलोचनां । स । लोकाः । द । जनाः ।

ऐ ) 'उत्साहहीनं' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?

अ । उत्साहम् । ब । सोत्साहम् । स । निरुत्साहाम् । द । उत्साहपूर्णम् ।

ओ)अनुच्छेदाात् एकम् अव्ययपदं चित्वा लिखत।

अ । विना । ब । फलस्य । स । गमनम् । द । अस्माकम् ।

## खखण्डः रचनात्मकम् कार्यम् । 15 अङ्काः

ख 1 भवान् अनुजः । स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति लिखिते पत्रे रिक्तस्थानानि उचितपदैः पूरयित्वा सम्पूर्णं पत्रं पुनः उत्तरपुस्तिकायां लिखत । **5**

परीक्षाभवनम्।

गाजियाबादतः।

तिथिः.................

प्रिय....................1 विवेक!

.......................... 2

अत्र कुशलं तत्रास्तु।अहम् अधुना निजविद्यालयस्य वर्णनं कर्तुं .................... 3 ।मम विद्यालयस्य ....................4 अतीव .......................5 चास्ति।एषः विद्यालयः अतिप्रसिद्धः अस्ति। .......................6 परीक्षापरिणामः ....................7 भवति।सर्वे ..............8 परिश्रमशीलाः सन्ति....................9 अपि अत्र अनुशासनप्रियाः सन्ति।विस्तरेण पुनः लेखिष्यामि।

भवतः ....................10 ।

अनुजः ।

| |
|---|
| अत्युत्तमः । मित्रं । सुन्दरं । छात्राः । मित्र! । इच्छामि । अध्यापकाः । सप्रेम नमः । अस्य । भवनम् । |

ख 2 प्रदत्तशब्दानां सहायतया अधोलिखितस्य चित्रस्य वर्णनं पञ्च वाक्येषु कुरुत। **10**



www.jsuniltutorial.weebly.com
JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science



मञ्जूषा

ग्रन्थालयस्य । पुस्तकानि । चित्रं । जनाः । इदं । पठन्ति । अत्र ।
अनेकानि ।सन्ति । समाचारपत्रम् । व्यजनानि ।पुस्तकालये । पुस्तककापाटिका

अथवा

विद्यालये स्वच्छता इति विषयमधिकृत्य प्रदत्तपद साहाय्येन पञ्चवाक्यानि रचयत।

कर्गदपत्राणि । अवकरपात्रे । सुधाखण्डान् ।क्षिपन्ति ।भितिषु ।
लिखन्ति ।अवकरं । त्रोटयन्ति ।पुष्पाणि । कर्तव्यम् ।पातयन्ति ।

**खण्डः ग अनुप्रयुक्त व्याकरणम् ।30 अङ्काः ।**

ग 1 रेखाङ्कितपदेषु सन्धिं/विच्छेदं वा कृत्वा लिखत। **5**

1 मनसः निग्रहं **वायोरिव** सुदुष्करं वर्तते।

अ ।वायोर्+ इव । ब । वाय + ओरिव । स ।वायोः+ इव । द ।वायुः+ इव ।

2 **सन्धिच्छेदः** क्रियताम् ।

अ ।सन्धि+ च्छेदः ।ब । सन्धिच्+ छेदः । स ।सन्धिं+ छेदः ।द ।सन्धि+ छेदः ।

3 कृषकः **मेघम्+पश्यति** ।

अ ।मेघं पश्यति ।ब ।मेघः पश्यति । स ।मेघमपश्यति ।द ।मेघां पश्यति ।

4 **कीटः + अपि** सुमनःसङ्गात् आरोहति सतां शिरः ।

अ ।कीट अपि । ब ।कीटोपि ।स ।कीटोऽपि ।द । कीटापि ।

5 यथा राजा **तथा + एव** प्रजाः ।

अ ।तथेव ।ब ।तथिव ।स । तथैव ।द । तथा एव ।

घ 2 समासं विग्रहं वा कृत्वा लिखत। **6**

1 सः **शास्त्रपारङ्गतः** अस्ति।

अ । शास्त्रेषु पारङ्गतः ।ब । शास्त्रस्य पारङ्गतः ।स ।शास्त्रात् पारं गतः ।

2 **राज्ञः गृहे** मेषयूथः आसीत्।

www.jsuniltutorial.weebly.com
JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science

अ ।राजगृहे । ब ।राज्ञगृहे । स ।राजागृहे ।

3 अधुना एकविंशति **शताब्दी** अस्ति ।

अ ।शतैः अब्दैः समाहारः ।ब ।शतम् अब्दं तयोः समाहारः । स। शतानां अब्दानां समाहारः।

4 **विद्यया समं** चक्षुः नास्ति।

अ ।विद्यै समं । ब ।विद्यासमं ।स । विद्यात् समं ।

5 समाजे **अहिंसा** सम्मननीया भवति ।

अ ।हिंसा न । ब ।न हिंसा । स ।हिंसां न ।

6 आकाशे **पयोदाः** गर्जन्ति।

अ ।पयः ददति इति । ब । पयः धारयति इति स । पयः धीयते अस्मिन् इति।

घ 3 प्रकृति प्रत्ययौ संयोज्य विभज्य वा लिखत। 5

1 त्वं **करणीयं** कुरु।

अ ।कृ+अनीयम् ब । कृ+अनीयर् स । कृ+अनीयः ।

2 वीराः अभ्युदये **धैर्य +मतुप्** भवन्ति।

अ. धैर्यवतः । ब । धैर्यवन्तः ।स । धैर्यमन्तः ।

3 त्वया शुद्धं जलं **पातव्यम्** ।

अ ।पा +तव्यत् ।ब ।पा+ तव्यम् । स ।पा+ तव्यः।

4 ।मनुष्यः **समाज +ठक्** प्राणी अस्ति।

अ ।सामाजिकी ।ब । सामाजिकः ।स ।समाजिकः ।

5 नमन्ति **फल + इन्** वृक्षाः ।

अ ।फलिना । ब ।फली ।स । फलिनः ।

घ 4 उचित अव्ययपदैः रिक्तस्थानानि पूरयत। 5

1 एषः कलहः........... भवताम् विनाशकारणम् भविष्यति।

2 वने सिंहः.............. गर्जति ।

3 चन्द्रं.............. आकाशः न शोभते ।

4 लोके चक्षुर्दानम् दुष्करम्.............. ।

5 .............. कालिदासः नाम महाकविः आसीत् ।

| विना ।उच्चैः । एव ।पुरा । नूनं |
|---|

घ 5 वाच्यानुसारम् उचितपदम् चित्वा वाक्यपूर्तिम् कुरुत। 5

1 ............ प्रार्थना क्रियते ।

क ।छात्रम् । ख। छात्रैः ।ग । छात्राः ।घ ।छात्रे।

2 मया चन्द्रः ............।

क ।पश्यते ।ख। पश्यानि । ग ।दृश्यते ।घ ।पश्यामि।

3 ............... पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।

क ।मूढाः । ख ।मूढः । ग ।मूढैः । घ मूढानाम्

4 ............... तमः हन्यते ।

क। चन्द्रस्य । ख ।चन्द्रेण । ग ।चन्द्रान् । घ ।चन्द्रः।

5 .................. गीतां पठन्ति ।

अ । भक्तैः ।ब ।भक्तेन ।स । भक्तः ।द । भक्ताः ।

घ 6 संङ्ख्यां दृष्ट्वा संस्कृते समयं लिखत। 4

1 गीता प्रातः 8 . 15..................... विद्यालयं गच्छति ।

2 मध्याह्ने 1 . 45 ........................ गृहमागत्य भोजनं करोति।

3 सायं 5 ........................ वादने सा क्रीडति।

4 9 .30 ..................... निद्रां करोति ।

## खण्डः घ -पठित अवबोधनम् 35 अङ्काः

अधोलिखितान् गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रश्नान् उत्तरत।

घ 1गद्यांशः

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसङ्ख्यां विलोक्य अचिन्तयत् - 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते ।नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गान्यपि याचन्ते।' एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

1 एकपदेन उत्तरत। 1

क ।के धनलाभमात्रेण सन्तुष्टाः आसन् ?

ख ।राजा कुत्र विचरन् अचिन्तयत् ?

2 पूर्णवाक्येन उत्तरत। 2

ग ।किं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम् ?

3 यथानिर्देशं समुचितमुत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत। 2

घ ।'याचकाः' इत्यस्य पर्यायपदं अत्र किं प्रयुक्तम् ?

अ ।दानवीराः ।ब । अर्थिनः ।स ।राज्ञः । द ।सौभाग्यशालिनः ।

च । 'गात्रेष्वपि' अस्य सन्धिविच्छेदः भवति।

अ। गात्रे +ष्वपि ।ब ।गात्रेषु + अपि । स ।गात्रेषू + अपि । द ।गात्रेषु + वपि।

घ 2 पद्यांशः

चञ्चलं हि मनः कृष्ण!प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।

www.jsuniltutorial.weebly.com
JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science

**1** एकपदेन उत्तरत। **1**

च ।किं चञ्चलम् अस्ति ?

छ ।मनसः निग्रहं कस्य इव दुष्करम् ?

**2** पूर्णवाक्येन उत्तरत। **2**

ज ।मनः कीदृशम् अस्ति ?

झ ।इदं श्लोकं कः कं प्रति वदति ?

**3** यथानिर्देशं समुचितमुत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत। **4**

ञ ।श्लोके "तस्य" इति सर्वनामपद कस्मै प्रयुक्तम् ?

अ ।कृष्णाय ।ब ।अर्जुनाय ।स ।मनसे । द ।वायवे ।

ट । 'अहम्' इति कर्तृपदस्य क्रियापदं किम् ?

अ ।चञ्चलं ।ब ।प्रमाथि । स ।मन्ये ।द ।दृढं ।

ढ । 'चञ्चलं हि मनः कृष्ण ' अत्र विशेष्यपदं किम् ?

अ ।मनः । ब ।चञ्चलं ।स ।कृष्ण ।द ।हि ।

ण । 'सुकरम्' इति पदस्य विपर्ययः कः ?

अ ।प्रमाथि । ब । दुष्करम् ।स । बलवत् ।द ।निग्रहम् ।

घ **3** नाट्यांशः ।

मेषस्य सूपकाराणां च कलहमवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत् - "एतेषां कलहो न वानराणां हिताय।"एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत्।

' सूपकाराणां मेषेण सह कलहः नूनं भवतां विनाशकारणं भविष्यति' उक्तं हि -

तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः
तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।।

ततः सर्वेषां संक्षयो न भवेत्। तदेतद् राजभवनं परित्यज्य वनं गच्छामः ।यतः

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ।।

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन् - 'भो किमिदम् उच्यते ? न वयं स्वर्ग समानेपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु -रूक्षफलानि भक्षयिष्यामः।' तत् श्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान्- 'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।'

**1** एकपदेन उत्तरत। **1**

अ ।के मदोद्धताः आसन् ?

आ। नीतिविदाम् अग्रणीः कः आसीत् ?

**2** पूर्णवाक्येन उत्तरत। **2**

इ। यूथपः सर्वान् कपीन् आहूय रहसि किम् अवदत् ?

ई । मदोद्धताः कपयः वानरयूथपतिम् किमवदन् ?

**3** यथानिर्देशं समुचितमुत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत। **2**

ई । 'यूयम्' इति कर्तृपदस्य नाट्यांशे किं क्रियापदं प्रयुक्तम् ?

अ ।अवदन् ।ब ।गच्छामि । स ।जानीथ । द ।उक्तवान् ।

उ । 'वने' इत्यस्य पर्यायपदम् अनुच्छेदात् चित्वा लिखत ।

अ ।रहसि ।ब ।अटव्यां ।स ।गृहे ।द ।राजभवने ।

ऊ । 'गृहीत्वा' इति पदस्य विपर्ययः कः ?

अ ।उक्त्वा । ब । त्यक्त्वा। स ।मत्वा । द ।विहाय ।

ऋ । 'भक्षयिष्यामः' अस्याः क्रियायाः कर्तृपदं किम् ?

अ ।अहं ।ब ।वयं ।स ।त्वं ।द । यूयम् ।

घ **4** प्रदत्तविकल्पेभ्यः समुचितम् भावं चित्वा लिखत । **4**

आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया

कालेन पादमादत्ते पादं सब्रह्मचारिभिः।

**1** भावार्थः ... शिष्यस्य शिक्षाप्राप्तेः ........... साधनानि सन्ति। सः शिक्षायाः प्रथमं चतुर्थांशं ........... आप्नोति। द्वितीयं चतुर्थांशं ......... प्राप्नोति ।तृतीयं ........... कालक्रमेण विन्दति। अन्तिमं च सब्रह्मचारिभ्यः लभते।

| चतुर्थांशं । | चत्वारि । | शिक्षकात् । | स्वबुद्ध्या । |
|---|---|---|---|

घ **5** अधोलिखितश्लोकस्य अन्वयं उचितपदैः पूरयत। **4**

दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः

कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः।।

**1** अन्वयः ... दास्यामि इति .............. यः मनः ........... कुरुते कार्पण्य अनिश्चितमतेः ततः ......... कः .................।

घ **6** स्थूलाक्षरपदमाश्रित्य प्रश्ननिर्माणं कुरुत। **4**

**1** काम एव **अस्माकं** शत्रुः ।

**2** अश्वाः **प्राणत्राणाय** इतस्ततः अधावन्।

**3** स राजा **तान्** उवाच ।

**4** सूर्योदये **तमः** नश्यति।

घ **7** अधोलिखितानि वाक्यानि घटनाक्रमेण पुनः लिखत। **4**

**1** नगरस्य समन्ततः राजा दानशालाः कारितवान् ।

**2** स्वपुण्यकर्मणां कारणात् स शिबीनां राजा बभूव।

3 राज्ञः निर्णयं श्रुत्वा सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

4 भगवान् बोधिसत्वः पूर्वजन्मनि बहूनि पुण्यकर्माणि अकरोत्।

5 अर्थिनां सङ्ख्या शनैः विरला जाता।

6 स राजा पुत्रवत् प्रजाः अपालयत्।

7 राजा अर्थिनां विरलसङ्ख्यां दृष्ट्वा अङ्गानि दातुं निश्चयम् अकरोत्।

8 प्रजाः दानशालासु अन्नवस्त्रादीनि प्राप्य सन्तुष्टाः अभवन्।

घ 7 स्थूलाक्षरपदस्य समानार्थकं पदं चित्वा लिखत।

1 अनिच्छन्नपि **वार्ष्णेय** ! बलादिव नियोजितः। 4

अ ।अर्जुन ।ब ।कौरव । स ।श्रीकृष्ण ।

2 **हेयं** किम् ? अकार्यम् ।

अ । अश्वः ।ब ।त्याज्यम् ।स । सुखम् ।

3 मेषः अहर्निशं **महानसं** प्रविश्य भक्षयति।

अ ।अश्वशालां ।ब ।दानशालां । स ।पाकशालां ।

4 **शुश्रूषा** श्रवणं चैव ग्रहणं धारणं तथा ।

अ ।श्रोतुमिच्छा ।ब ।सेवा । स ।श्रवणं ।

समाप्तम्

www.jsuniltutorial.weebly.com
JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science